Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १८०
मे - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### आकाङ्क्षायाः शत्रुः

सहिष्णुः मनुष्यः प्राचीनकालात् उपदेशानां झञ्झावातैः पीडितः अस्ति । वयम् उपदेशमुक्तस्य आश्रमस्य कल्पनाम् अपि कर्तुं न शक्नुमः । यत्र यत्र दीर्घं श्मश्रु दृश्यते तत्र तत्र निश्चयेन केचन साम्प्रदायिकाः निशिताः उपदेशाः लम्बिताः भवन्ति । किमपि धार्मिकं प्रवचनम् उपदेशस्य साहाय्येन विना जीवितुं न शक्नोति । क्वचित् स्वमते दृढाम् आसक्तिं धारयन्तः उपदेशकाः श्रद्धालूनां कर्णपथे सामूहिकम् आक्रमणम् अपि कुर्वन्ति । केचन अपराधाः धर्मसम्मताः भवन्ति । अतः तेषां कोलाहलः अपि प्रशान्तः भवति । उपर्युक्तः अपराधः पूर्णतः धर्मसम्मतः वर्तते । अतः वार्तापत्रेषु न प्रकाश्यते ।

वस्तुतः मूलहीना उपदेशपरम्परा आकाङ्क्षायाः अनादरं करोति । ऋषिभिः प्रयुक्तानाम् उपदेशानां गुणवत्ता साम्प्रतं न दृश्यते । उपदेशस्य श्रवणपानं मनुष्याय अद्यापि रोचते । परन्तु तदर्थं योग्यं स्थानं दुर्लभम् अस्ति । परिणामतः श्रद्धालुः मनुष्यः कुतश्चित् कथञ्चित् उपदेशं प्राप्नोति । ततः उपदेशग्रस्तः सः जीवन् काञ्चित् पीडाम् अनुभवति । क्वचित् प्राकृतिकी आकाङ्क्षा धर्मस्य व्याजेन आपद्ग्रस्ता भवति । बहुत्र सन्नयासिनः अपि उपदेशपीडिताः भवन्ति । यदा उपदेशभारपीडितः कश्चित् सन्न्यासी कदाचित् किञ्चित् 'मुक्तः' भवति तदा किं भवति इति वयं वार्तापत्रेषु पठामः एव । एतादृशी उपदेशपरम्परा दम्भपरम्परायाः जननी अस्ति ।

आकाङ्क्षायाः परिपूर्तिः प्रत्येकं मनुष्यस्य अधिकारः अस्ति । वयम् अनुभवामः यत् प्रायः उपदेशाः, अभिप्रायाः, आग्रहाः, आचाराः, रूढयश्च सामान्यान् जनान् एव स्पृशन्ति । तेषां जनानां प्राकृतं जीवनं, प्राकृतः अधिकारश्च सदा अवमन्यते । अन्यत्र वयं पश्यामः यत् चलचित्रस्य केचन धृष्टाः नटाः आत्मप्रमोदे निमज्य स्वैरं जीवितुं शक्नुवन्ति ।

समाजस्य दुर्भाग्यम् अस्ति । श्रीरामः स्वीयम् अवतारकृत्यं समाप्य कालधर्मं प्राप्तवान् । किन्तु सः रजकः इतोऽपि जीवति । सः इदानीम् आकाङ्क्षायाः शत्रुः अस्ति ।

## कोषाधिकारिण: नियुक्ति:

चन्द्रचूड: प्रमोददेशस्य राजा। स: प्रजारक्षक:। प्रजा: पुत्रवत् पालयति स्म स:। तस्य शासनकाले देशे सर्वेषां सौख्यम् आसीत्। तस्य मन्त्रिण: कोषाधिकारिप्रभृतय: च समर्था: एव आसन्।

अथ कदाचित् वृद्ध: कोषाधिकारी दिवंगत:। तस्य स्थाने क: नियोक्तव्य: इत्यत्र राज्ञा समस्या अनुभूता।

दिवंगतस्य कोषाधिकारिण: पुत्रस्य नाम विभीषण: इति। स: सामर्थ्येन पितरम् अपि अतिशेते स्म। अत: तमेव कोषाधिकारिणं कर्तुम् इच्छति स्म राजा। किन्तु तत्र केचन क्लेशा: आसन्।

कोषाधिकारिपदं प्रमुखम् इत्यत: तत् स्थानं प्राप्तुम् इच्छन्ति स्म बहव:। तेषु राज्ञ्या: बन्धु: कश्चित्, राज्ञ: भगिनीपते: बन्धु: कश्चित् च अन्यतमौ आस्ताम्। राज्ञी, राज्ञ: भगिनी च राजानं सानुरोधं वदत: स्म यत् मम बन्धु: एव कोषाधिकारित्वेन नियुक्त: भवेत् इति। यदि एकस्या: बन्धो: नियुक्ति: स्यात् तर्हि अपरस्या: खेद:। भवत्यो: बन्धु: न नियुज्यते इति साक्षात् वक्तुम् अपि न शक्यते। यत: उभयो: अपि बलम् अधिकम् अस्ति।

एतस्या: समस्याया: परिहार: कथमिति राज्ञा न ज्ञातम्। अत: स: वृद्धं मन्त्रिणम् आनाय्य स्वस्य समस्यां विस्तरेण निवेदितवान्। तदा वृद्ध: बुद्धिवर्मा अवदत् – ''प्रभो ! प्रजाहितम् एव चिन्तनीयं राज्ञा। अत: एतस्मिन् विषये जागरूकतया व्यवहरणीयम्। भवत: निर्णय: कस्यापि खेदाय न भवेत्। अत: भवान् राज्ञ्या: सहोदरं रङ्गदेवं, भगिन्या: पतिं राजगुप्तं च आनाय्य समालोचनं करोतु'' इति।

मन्त्रिण: सूचनाया: अनुगुणं राजा रङ्गदेवं राजगुप्तं च आनाय्य अवदत् – ''भवन्तौ उभौ अपि मदीयौ। यौ कोषाधिकारिपदम् इच्छत: तौ भवतो: बान्धवौ एव। अत: भवन्तौ परस्परवार्तालापेन कमपि निर्णयं कुरुताम्। भवतो: एकमत्यं स्यात् इति मम अपेक्षा'' इति।

रङ्गदेव: राजगुप्त: च वार्तालापं कृतवन्तौ। उभयो: अपि प्रबला इच्छा यत् ममैव बन्धु: कोषाधिकारी स्यात् इति। अत: तौ एतद्विषये एकमत्यं प्राप्तुं न शक्तवन्तौ। ''भवान् एव अन्तिमनिर्णयं करोतु'' इति तौ राजानम् उक्तवन्तौ।

तदा चन्द्रचूड: तौ उक्तवान् – ''भवतो: उभयो: अपि प्रबला इच्छा यत् ममैव बन्धु: कोषाधिकारी स्यात् इति। अत: अहं चिन्तयामि यत् त्रिसदस्यात्मिकाया: मार्गदर्शकसमिते: नियुक्ति: वरा इति। तेषु त्रिषु सदस्येषु अन्यतम: भवतु राजोद्योगी देवनाथ: अपि। न्यायाधिकारिण: सकाशात् भवन्तौ मार्गदर्शकसमिते: रचनासम्बद्धान् नियमान् ज्ञात्वा कोषाधिकारिणं चिनुताम्'' इति। राज्ञ: वचनस्य तात्पर्यम् अवगतं रङ्गदेवेन राजगुप्तेन च। 'य: देवनाथं स्वपक्षीयं कर्तुं शक्नोति तदीय: अभ्यर्थी कोषाधिकारिपदं प्राप्तुम् अर्हति' इति राज्ञा परोक्षतया सूचितम् इति चिन्तितवन्तौ तौ। अत: राज्ञ: एषा व्यवस्था तयो: प्रिया जाता। अनन्तरदिने तौ न्यायाधिकारिणा मिलितवन्तौ। न्यायाधिकारी अवदत् – ''मार्गदर्शकसमिते: यदि सदस्यता भवद्भ्याम् इष्यते तर्हि भवतो: बन्धु: कोऽपि कोषाधिकारिस्थानप्राप्ते: प्रयत्नं कर्तुं न अर्हति'' इति। एतदनन्तरं बहुधा विचिन्त्य तौ निर्णीतवन्तौ यत् आवां मार्गदर्शकसमिते: सदस्यौ न भवाव:, प्रत्युत उपायेन देवनाथं स्वपक्षीयं कृत्वा इष्टं साधयिष्याव: इति।

कदाचित् रङ्गदेव: एकान्ते देवनाथेन मिलित्वा अवदत् – ''भवत: निर्णये मम पूर्ण: विश्वास: अस्ति। तथापि किञ्चित् ज्ञापयितुम् इच्छामि। अहं राज्ञ: प्रिय: अस्मि इति भवान् जानाति एव। राजा मम वचनं कदापि न तिरस्करोति।

तम् उक्त्वा अहं भवतः सम्मानं कारयिष्यामि। यदि भवान् मम इच्छायाः विरोधं कुर्यात् तर्हि भवन्तं कारागारं प्रेषयिष्यामि। मदीयाय अभ्यर्थिने कोषाधिकारिपदं दाप्यते चेत् भवतः जीवनं सुखमयं भविष्यति" इति।

देवनाथः अङ्गीकारपूर्वकं शिरः चालितवान्, रङ्गदेवं ततः प्रेषितवान् च। एतदनन्तरं राजगुप्तः देवनाथेन मेलितुम् आगतः। 'मम अभ्यर्थी एव कोषाधिकारिपदे नियुक्तः स्यात्, अन्यथा भवता क्लेशः अनुभोक्तव्यः भवेत्' इति साधिकारम् उक्तवान् सः। तदा देवनाथः अवदत् – "महाशय ! भवतः आगमनात् पूर्वं रङ्गदेवः अपि आगत्य स्वस्य अभ्यर्थी एव कोषाधिकारी भवेत् इति सूचयित्वा गतवान्। पदं तु एकम् एव अस्ति। तत्र उभयोः नियुक्तिः तु न शक्यते। बलेन प्रभावेण च रङ्गदेवः भवत्तुल्यः एव। इदानीं किं करणीयं मया ?" इति।

यद्यपि राजगुप्तः राज्ञः आत्मीयः एव, तथापि राज्ञ्याः भ्रातृत्वकारणतः रङ्गदेवस्यैव प्रभावः अधिकः।

एतत् स्मरन् राजगुप्तः – "रङ्गदेवस्य अभ्यर्थितः अपि मम अभ्यर्थी एव अधिकसमर्थः। अधिकसामर्थ्यवान् एव तस्मिन् पदे नियुक्तः भवेत्" इति अवदत्। यत् प्रवृत्तं तत् सर्वं देवनाथः राजानम् अवदत्। "अलं चिन्तया। अग्रे किं करणीयम् इति अहं चिन्तयिष्यामि" इति उक्त्वा तं प्रेषितवान् राजा। ततः राजगुप्तं रङ्गदेवं च आनाय्य सः अवदत् – "देवनाथः सर्वविधानि विवरणानि ज्ञात्वा निर्णीतवान् अस्ति यत् नारायणः नाम कश्चित् कोषाधिकारी स्यात् इति। इदानीं किं करणीयं मया ?" इति।

स्वस्य अभ्यर्थी यदि कोषाधिकारी न भवेत् तर्हि अन्यस्य अभ्यर्थी अपि न भवेत् इति रङ्गदेवराजगुप्तयोः अभिप्रायः आसीत्। अतः तौ उक्तवन्तौ – "देवनाथस्य निर्णयः अनुमन्यते" इति।

तदा राजा कृत्रिमं खेदं प्रकटयन् अवदत् – "नारायणः भवतोः बन्ध्वोः अपेक्षया अपि सामर्थ्येन अनुत्तमः इति भाति मम। समर्थतरस्य एव नियुक्तिः युक्ता खलु भवति ?" इति।

"कोषाधिकारी सामर्थ्येन उत्तमः एव स्यात् इति तु सत्यम् एव" इति उभौ राजबन्धू अपि उक्तवन्तौ।

तदा राजा अवदत् – "भवन्तौ मम बान्धवौ। भवतोः सन्तोषः एव मम सन्तोषः। देवनाथेन चितः अभ्यर्थी समर्थः तु न। समर्थः एव चितः भवतु इति भवतोः अपि अपेक्षा। मम भाति यत् दिवङ्गतस्य कोषाधिकारिणः पुत्रः विभीषणः एव एतदर्थं दक्षः इति। पित्रा सम्यक् बोधितः सः एतत् कार्यं कर्तुं समर्थः। एषः मत्पक्षीयः जनः इति चिन्त्यताम्। एतस्य कोषाधिकारिता अनुमन्यताम्" इति।

यदि एतत् न अनुमन्येत तर्हि प्रतिपक्षिणः अभ्यर्थी चितः भवेत्। एतत् तु उभयोः अपि सम्मतं न आसीत्। अतः तौ राज्ञः प्रस्तावम् अङ्गीकृतवन्तौ। एवं विभीषणः कोषाधिकारी जातः। एतदनन्तरं राजा वृद्धेन मन्त्रिणा मिलित्वा अवदत् – "लघुः अपि सर्पः महता दण्डेन एव प्रहरणीयः इति काचित् लोकोक्तिः श्रूयते। भवतः मार्गदर्शनम् अनुसृतं मया। तस्मात् इष्टः जनः पदे नियुक्तः अभवत्। अनिष्टौ अभ्यर्थिनौ उपायेन निवारयितुं शक्तं मया" इति।

एतत् श्रुत्वा मन्त्री मन्दहासपूर्वकम् अवदत् – "प्रभो ! वाराङ्गनेव नृपनीतिरनेकरूपा इति किञ्चन वचनं श्रूयते। सर्वदा राज्ञा प्रजानां हितम् एव चिन्तनीयम्। बान्धवानां स्वार्थपरता उपायेनैव निवारणीया। कस्यापि असन्तोषः यथा न स्यात् तथा करणाय महत् कौशलम् आवश्यकं भवति। तादृशं महत् कौशलम् अवलम्ब्य भवता कोषाधिकारिणः नियुक्तिः कृता। भवतः राजनीतिकुशलता प्रशंसार्हा एव" इति।

## विश्वशान्तेरुपाय:

डॉ. सुखेश्वर: झा



विश्वं जगत् । तस्य शान्तेः कः स्यात् उपायः इति वस्तुतः विचारणीयः प्रश्नः ।

संसारे सम्प्रति विषमता एधमाना वर्तते । ईर्ष्या सर्वत्र प्रसरति । एको देशः अपरं देशं द्वेष्टि । मनुष्यो मनुष्याय ईर्ष्यति द्रुह्यति क्रुध्यति च परस्परस्य उत्कर्षम् असहमानः । सभ्यतायाः डिण्डिमनादो बोभवीति । परन्तु नियमः वन्य एव प्रबलः । वने अनेके वसन्ति । तेषु च अबलो बलिभिः हिंस्यते । तस्य रक्तः पेपीयते । तस्य मांसः चाखाद्यते । तद्वत् लोकेषु अपि रूपान्तरेण स्थितिः एषैव प्रतीयते । जनो दुर्बलो बलिभिः सन्ताड्यते हन्यते वा । दुर्बलं राष्ट्रं बलिना विहन्यते । दुर्बलः पक्षः सबलेन प्रतार्यते पीड्यते वा । न केवलं दूरवर्तिषु अपि तु अन्तरङ्गेषु ज्ञाति-बन्धुजनेष्वपि भ्रातृष्वपि कलहः-वैषम्यम् - अशान्तिः दरीदृश्यते । अस्यां स्थितौ विश्वशान्तेः उपायः चिन्तनीयतया अवश्यम् उपतिष्ठते ।

आधुनिकः कालो विज्ञानस्य अभिधीयते । विज्ञानं विशिष्टं ज्ञानं भवति । वस्तुतः तत् तथेति मन्तव्यम् । किन्तु सदुःखम् एतत् अभिधानीयं भवति यत् तद् विशिष्टत्वं मानव-कल्याणमपेक्ष्य तत्संहाराय अधिकतरम् उपयुज्यते । विज्ञानस्य विकासेन सहैव घातकानाम् अस्त्राणां शस्त्राणाञ्च उदयः सुप्रबलः सञ्जातः । श्रूयते यत् अमेरिकायाः रूसस्य च पार्श्वे प्रचुरतया तावन्तः मारकपदार्थाः सन्ति यावद्भिः मनुष्याणां समग्राणाम् एव संहारः क्षण एव भवेत् यदि तेषाम् तथा दुरुपयोगः क्रियेत । असहनशीलता तावती विवृद्धा यद् ब्रह्मास्त्र-प्रक्षेपणेऽपि जनाः संकोचं नैव कुर्युः । शक्ति-प्रदर्शनसञ्चय-दर्शनेषु जगत् अशान्तात् अशान्ततरं सम्पद्यमानम् अस्ति । अशान्तिः वस्तुतो विश्वस्य प्रबला समस्या उपस्थिता वर्तते ।

प्रकृतेः स्वभावात् पूर्वपुरुषात् परपुरुषे संख्याबाहुल्यं भवत्येव । एकस्य धान्यस्य मञ्जर्याम् अनेकानि धान्यनि सर्व-दृष्टानि । विविधानां धान्यानां शाकानां तरुगुल्मानां, पक्षिणां पशूनां नरपशूनाञ्च सैवगतिः स्वाभाविकी । सप्त श्रेणीः प्राग् एकस्य जनस्य सन्ततिभिः तद्वंशोत्पन्नाभिः एव इदानीम् एको ग्रामः सम्पन्नः । अतः वर्धमाना जन-सङ्ख्या एकतः, अपरतश्च उपयोज्य-सामग्री न्यूना इति स्वार्थ-संघर्षात् अशान्तिः वर्धतेतराम् । सैषा स्थितिः न्यूनाधिकतया विश्वव्यापिनी । अतः सकले संसारे अशान्तिः विविधकारणेन वर्ततेतराम्, वर्तिष्यते च वर्धिष्यत एव वा इति एवम् एव प्रतिभाति । अतः शान्तेरुपायो वस्तुतो जिज्ञास्यः ।

अत्रेदम् अवधेयम् - जनसङ्ख्यावृद्धिः संसार-स्वभावात् अनिवार्या एव । सा च उदग्रा सती आशु एव अति-विकटा मा भूत् इति जन्मक्रम-नियन्त्रणम् अपि आवश्यकम् । परन्तु एतन्मूलायाः अशान्तेः वास्तविकं समाधानम् उद्योगस्य बहुलीकरणात् सेवा-नियोजनावसर-सम्वर्द्धनात् उपयोज्यवस्तूनां प्राचुर्येणोत्पादनात् उत्पन्नस्य च सम्यगावण्टनप्रबन्धात् एव सम्भवति । अभावे स्वभावोऽपि नश्यति । बुभुक्षितः किन्न करोति पापम् इति प्रसिद्धम् । अतः आवश्यकता-शान्त्या एव वास्तविकी शान्तिः ।

# मासवार्ता

## आरब्धाः श्रीमद्भगवद्गीताश्लोकोच्चारणवर्गाः




श्रीमद्भगवद्गीतायाः अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन श्रीमद्भगवद्गीतायाः श्लोकोच्चारणस्य वर्गाः आयोजिताः । अभ्यासक्रमेऽस्मिन् ४ कक्ष्यातः आरभ्य ज्येष्ठाः आहात्य ५० छात्राः एप्रिलमासस्य १९ दिनाङ्कतः मईमासस्य १० दिनाङ्कं यावत् विविधेषु वर्गेषु श्रीमद्भगवद्गीतायाः श्लोकानाम् उच्चारणं भावार्थं च अपठन्। श्रीश्यामः पटेलः छात्रेभ्यः मार्गदर्शनं प्रायच्छत्।

## आयोजितानि व्याख्यानानि




संस्कृतरसिकाः संस्कृतसाहित्यस्य परिचयं प्राप्नुयुः इति विचार्य संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, एकलव्य-संस्कृत-एकेडेमी, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् एप्रिलमासस्य ३ दिनाङ्के श्रीजिगरः अध्यारुः "संस्कृत सुभाषितों का मनुष्य जीवन पर प्रभाव" इति विषये, एप्रिलमासस्य १० दिनाङ्के डॉ. गोपालः उपाध्यायः "संस्कृत सुभाषितों का मनुष्य जीवन पर प्रभाव" इति विषये, एप्रिलमासस्य १७ दिनाङ्के डॉ. पङ्कजः ठाकरः "जगन्नाथ विरचित गङ्गालहरी" इति विषये, एप्रिलमासस्य २४ दिनाङ्के डॉ. भरतकुमारः परमारः "शूद्रकरचितं मृच्छकटिकम्" इति विषये च मनोहरं व्याख्यानं प्रायच्छन्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## कृपया हसन्तु

ह्यः कोरोना मार्गमध्ये तिष्ठन् आसीत् । अहं तं पृष्टवान् - "भोः भवान् निर्वाचनक्षेत्रं किमर्थं न गच्छति ? " मम वचनं श्रुत्वा कोरोना अवदत् - "अधुना तु अहं बालः इतोऽपि मम १८ वर्षाणि न जातानि ।"

★ ★ ★ ★ ★

कश्चन शाकविक्रेता दीर्घकालात् शाकानाम् उपरि जलं क्षिपन् आसीत् । शाकं क्रेतुम् इच्छुकः एकः ग्राहकः प्रतीक्षमाणः आसीत् । किञ्चित् समयानन्तरं शाकविक्रेता - (ग्राहकं प्रति) वदतु, किं ददानि ?

ग्राहकः - मरिचस्य यदि मूर्च्छा गता स्यात् यदि मरिचेन चेतना प्राप्ता स्यात् तर्हि एककिलोपरिमितं मरिचम् ददातु ।

★ ★ ★ ★ ★

पिता - (पुत्रम् उद्दिश्य) भोः वत्स ! एतानि द्विसहस्ररूप्यकाणि गृह्णातु ।

पुत्रः - (साश्चर्यम्) एतत् किमर्थम् ?

पिता - एतत् भवता परिश्रमेण अर्जितं धनं वर्तते ।

पुत्रः - भोः पितः ! मया तु किमपि न कृतम् । भवान् कस्मिन् विषये वार्तालापं करोति ?

पिता - यदा आरभ्य त्वया दूरभाषयन्त्रे 'WhatsApp' स्थापितम् अस्ति तदा आरभ्य आरात्रं भवान् जागर्ति । अतः रात्रौ अस्माभिः द्वारपालः न स्थापितः । कारणं तस्य कार्यं भवान् करोति । अतः एतत् रात्रिकालस्य द्वारपालस्य धनं द्विसहस्ररूप्यकाणि सन्ति । गृह्णातु ।

## सुभाषितम्

– संस्कृतविकिपिडीयाजालस्थानात्

**आचार्यात् पादम् आधत्ते पादं शिष्यः स्वमेधया ।**
**पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥**

**तात्पर्यम्** – शिष्यः आचार्यात् पादभागं ज्ञानं प्राप्नोति । स्वीयया बुद्धिशक्त्या अपरं पादभागं सम्पादयति । सहाध्यायिभ्यः अन्यत् पादभागम् आसादयति । कालक्रमेण अपरं पादभागं ज्ञानं प्राप्स्यति ।

**आगच्छति यदा लक्ष्मीः नारिकेलफलाम्बुवत् ।**
**निर्गच्छति यदा लक्ष्मीः गजभुक्तकपित्थवत् ॥**

**तात्पर्यम्** – लक्ष्म्याः आगमनं नारिकेले जलस्य सङ्ग्रहणं यथा (क्रमेण) भवति तथा भवति । किन्तु तस्याः निर्गमनं तु गजेन कपित्थभक्षणं यथा (सहसा) भवति तथा एव भवति ।

**आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।**
**परं परोपकारार्थं यो जीवति स जीवति ॥**

**तात्पर्यम्** – प्रपञ्चे विद्यमानाः सर्वे अपि मनुष्याः स्वहितं, स्वसुखं च सम्पादयन्ति । अतः आत्मनः निमित्तं सर्वः अपि जनः जीवति एव । परन्तु ये जनाः अन्येषां हितम्, अन्येषां सुखं च कामयमानाः तदर्थं जीवन्ति, तेषां जीवनमेव सार्थकं जीवनम् ! धन्यं जीवनम् ! परोपकाररहितं जीवनं तु निरर्थकमेव ।

# ज्ञानसरिता

श्यामः पटेलः

**अस्माकं पृथिवी** –अस्माकं पृथिव्याः भूमध्यरेखायाः व्यासः १२,७५७ किलोमीटर–परिमितः अस्ति। एवञ्च ध्रुवमण्डलयोः व्यासः १२,७१४ किलोमीटर–परिमितः अस्ति। पृथिव्याः भूमध्यरेखायाः परिधिः ४०,०७५ किलोमीटर–परिमितः वर्तते। पृथिवी प्रतिघण्टं १,०७,१६० किलोमीटर–परिमितेन वेगेन सूर्यस्य प्रदक्षिणां करोति। एषा प्रदक्षिणा अर्थात् अस्माकम् एकवर्षम् । पृथिव्याः प्रदक्षिणाकालः ३६५ दिनानि पञ्चघण्टाः अष्टचत्वारिंशतन्निमेषाः क्षणे प्रदक्षिणां समापयति । पृथिवी तस्याः ध्रुवयष्टौ चक्राकाररूपेण प्रतिघण्टं १६१० किलोमीटर–परिमितेन जवेन भ्रमति । एतत् चक्रं त्रयोविंशतिघण्टानन्तरं षट्पञ्चाशत्तमस्य निमेषस्य चतुर्थे क्षणे समाप्यते। पृथिव्याः प्रदक्षिणामार्गः अण्डाकारः अस्ति। अतः सूर्यपृथिव्योः मध्ये अन्तरं परिवर्तितं भवति।

जनवरीमासस्य तृतीये दिनाङ्के एतद् अन्तरं न्यूनातिन्यूनं भवति । एवञ्च जुलाईमासस्य चतुर्थे दिनाङ्के अधिकाधिकं भवति। जूनमासस्य एकविंशतितमे दिनाङ्के पृथिव्याः कर्कवृत्ते सूर्यकिरणाः ९० डिग्रीपरिमितं यावत् किञ्चित् तिर्यक् पतन्ति। ततः उत्तरध्रुवीयप्रदेशेषु वर्षस्य दीर्घतमं दिनं भवति। एषा घटना 'समर सोल्टिस' नाम्ना ख्याता । यदा डिसेम्बरमासस्य द्वाविंशतितमे दिने सूर्यांशवः मकरवृत्ते पृथिव्याः अभिमुखीभवन्ति तदा दक्षिणध्रुवीयभागे दीर्घतमं दिनं भवति। एषा घटना 'विन्टर सोल्टिस' उच्यते। मार्चमासस्य एकविंशतितमे दिनाङ्के डिसेम्बरमासस्य त्रयोविंशतितमे दिनाङ्के च पृथिव्याः भूमध्यरेखायाः उपरि सूर्यरश्मयः अभिमूखीभूय आगच्छन्ति। अतः तयोः द्वयोः दिनयोः रात्रिः दिवसश्च द्वादशघण्टात्मकः भवतः। पृथिव्याः अयस्कान्तक्षेत्रं बलवत्तमं वर्तते। कारणम् अस्ति यत् तस्याः उदरे रूपकधातोः लोहधातोश्च प्राचुर्यम् अस्ति। ततः पृथिवी सौरपवनात् स्वात्मानं रक्षितुं समर्था।

अस्माकं निवासरूपिणी पृथिवी अन्यतमः ग्रहः अस्ति यत्र जलञ्च जीवसृष्टिः च विद्यते।

## शब्दमञ्जूषा

| | |
|---|---|
| **पथिकावासः** | hotel |
| **निरीक्षकः** | inspector |
| **संस्था** | institution |
| **अन्तरिमशासनम्** | interim government |
| **कारागारम्** | jail |
| **न्यायः** | justice |
| **प्रमाणपुरुषगणः** | jury |
| **विधानसभा** | legislative assembly |
| **विधानपरिषद्** | legislative council |
| **पत्रपेटिका** | letter-box |
| **पुस्तकालयः** | library |
| **स्थानीयस्वायत्तशासनम्** | local self government |
| **ध्वनिविस्तारणयन्त्रम्** | loudspeaker |
| **यन्त्रम्** | machine |
| **दण्डाधिकारी** | magistrate |

## किं भवन्तः जानन्ति ?

**१ ) कृष्णस्य जन्म कदा जातः आसीत् ?**
(क) भाद्रपदकृष्णाष्टम्याम् (ख) वैशाखशुक्लनवम्याम्
(ग) फाल्गुनशुक्लद्वितीयायाम् (घ) आषाढकृष्णपञ्चम्याम्

**२ ) गौतमबुद्धस्य जन्म कस्यां तिथौ जातः आसीत् ?**
(क) आश्विनशुक्लदशम्याम् (ख) कार्तिकशुक्लदशम्याम्
(ग) फाल्गुनशुक्लद्वादश्याम् (घ) चैत्रकृष्णत्रयोदश्याम्

**३ ) यस्मिन् दिवसे रामः रावणोपरि विजयं प्राप्तवान् तस्मिन् दिवसे का तिथिः आसीत् ?**
(क) अष्टमी (ख) नवमी (ग) दशमी (घ) एकादशी

**४ ) स्वामिनः दयानन्दस्य जन्म कदा अभवत् ?**
(क) संवत् १६८० (ख) संवत् १८८०
(ग) संवत् १८८१ (घ) संवत् १७८१

**५ ) नागपञ्चम्याः उत्सवः कस्यां तिथौ भवति ?**
(क) भाद्रपदकृष्णपञ्चम्याम् (ख) श्रावणकृष्णपञ्चम्याम्
(ग) श्रावणशुक्लपञ्चम्याम् (घ) चैत्रशुक्लपञ्चम्याम्

**६ ) सेतुबन्धं रामेश्वरं रामः कस्यां तिथौ अस्थापयत् ?**
(क) वैशाखशुक्लद्वादश्याम् (ख) ज्यैष्ठशुक्लपञ्चम्याम्
(ग) आषाढकृष्णाष्टम्याम् (घ) ज्येष्ठशुक्लदशम्याम्

उत्तराणि – (१) क (२) क (३) ग (४) ग (५) ग (६) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**Date :** 14/5/21 to 25/5/21
**Day :** Daily
**Time :** 4:00 pm to 5:30 pm
**Fees :** 1500/-

## बालसंस्कृतवर्गः

**Date :** 14/5/21 to 25/5/21
**Day :** Daily
**Time :** 9:00am to 10:30am (Cl 1 to 4)
11:00am to 12:30pm (Cl 5 to 8)
**Fees :** 2000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## सन्धिः

( संस्कृत की प्रमुख सन्धियों का अध्ययन )

**Date :** 14/5/21 to 12/6/21
**Day :** Fri - Sat
**Time :** 6:30 pm to 8:00 pm
**Fees :** 2500/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**Admission Open**

Value Education Through Sanskrit in

## बालसंस्कृतवर्गः

(Class SKg to 8)

**Date :** 12/6/21 to 26/3/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006